Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४६१

Title सर्वप्रायश्चित्त प्रयोगः

Author

Extent १० Age

Subject धर्मशास्त्रं

रुद्रकल्पद्रुमोक्त सर्वप्रायश्चित्तप्रयोगः

४४४९

4449

#2 MISSING.

F. = 9

पद्धतिः सर्वप्रायश्चित

३

२

॥याज्ञिकदेवकृतस्येदं पत्रालिहश॥

१

(अज्ञानकृतानां पर्षत्त्वेन चतुर्णामेकस्यैवोपवेशनं।

रुद्रकल्पद्रुमोक्त ४ योगेनोलिख्यते १५

॥ श्रीगणेशाय नमः ॥ अथ प्रायश्चित्तम् ॥ तत्र सामग्रीं संपाद्य चतुरस्त्रीनेकं वात्मविदं प
र्षत्त्वेनोपवेशनं। अनुतापवता देशकालौ संकीर्त्य प्रारिप्सितप्रायश्चित्तांगतया विहि
तं सचैलं स्नानं महं करिष्य इति संकल्पपूर्वकं सचैलं स्नायात्। अशक्तौ तु पादपाण्योः प्र
क्षालनं वा। ततो वाग्यमनधर्मेण किंचिन्नवाससा पर्षत्समीपे गमनं। सत्त्वाशक्तौ तं प्रदक्षि
णीकृत्य। हृदये दूयमानो धरण्यां साष्टांगं प्रणमेत्। ततस्तं द्विजाः पृच्छेयुः। तद्यथा। किं ते
कार्यं वदास्माभिः किं वा मृगयसे द्विजात त्वं तो ब्रूहि तत्सर्वं सत्यं हि गतिरात्मनः। अस्मा
कं चैव सर्वेषां सत्यमेव परं बलं। यदि चेदृसेऽसि त्वं नियतं प्राप्स्यसे शुभं। यथागतोऽस्य शिवः
सत्येन न त्वं शुद्ध्यसि कर्हिचित् इति द्विजैः पृष्टे न तेन प्रत्येकं गोवृषयोः (एकैकं) प्रत्याम्नायत्वे ॥१॥

एतज्जन्मप्रभृति अद्य दिनं यावत् ज्ञाताज्ञात कामाकाम सकृदसकृत्कृत कायिक वाचिक मा
नसिक सांसर्गिक स्पृष्टास्पृष्ट भुक्ताभुक्त पीतापीत सकलपातकातिपातकोपपातक लघुपातक
संकरीकरण मलिनीकरण अपात्रीकरण जातिभ्रंशकर प्रकीर्णक पातकानां महापातक व्यति
रिक्तानां पातकानां मध्ये संभावितानां पातकानां क्षयोऽनेन पर्षदुपदिष्टेन सर्वप्रायश्चित्तेना
मुकप्रत्याम्नायद्वारा प्राच्योदीच्यांगसहितेनाचीर्णेन तव शर्म भविष्यतीति तेन त्वं कृतार्थो भविष्य शुद्धि ५
सीति त्रिरुपदेशः कार्यः। सर्वप्रायश्चित्तं तु शक्त्यनुसारेण षडब्दं त्र्यब्दं सार्द्धाब्दमन्यद्वा पर्षदा
नुमतं प्रत्याम्नायाश्च एकगोदाने सुवर्णरूप्यनिष्क तदर्द्ध तदर्द्धानां गोमूल्यानां शक्त्या दाने
पंचपुराणमिते त्रिपुराणमिते वा गोमूल्यभूते रूप्यदाने षोडशवस्त्रपरिमाणनिष्कापरप
र्यायदीनार तदर्द्ध तत्पादान्यतमरूपे वा गोमूल्यभूते रूप्यदाने निवर्तनद्वादशांशभूमिदाने

द्ध कार्यं भवद्भिरनुग्रह इति विज्ञापयेत्

द्वादशब्राह्मणभोजने गायत्र्ययुतजपे गायत्र्याज्याहुतिभिर्वा तिलाहुतिसहस्रेण प्राणायामशत
द्वये संहितापारायणे षडंगरुद्रैकादशिन्यां पावकेष्ट्यां पावमानेष्ट्यां शुक्रकेशस्य द्वादशस्ना
ने पुण्ये द्विगुणे द्वादशामान्नह्यानादौ च प्रत्येकमेकः प्राजापत्य इति। तत्र शक्तस्यामान्नं द्विगुणं त्रि
गुणं चतुर्गुणं असंभवे द्विगुणं द्रव्यमित्यादि योज्यं। निष्क्रयजो कृशास्त्रयोरेकवाक्यतया माषा
श्चत्वारिंशत्। तदर्द्धं विंशतिस्तदर्द्धं दश। मुख्यं सुवर्णं तद्दशकोनावरजतं ग्राह्यं। चांद्रायण
स्याष्टौ प्राजापत्याः प्रत्याम्नायाः। अशक्तस्य तु षट् पंच त्रयो वा प्राजापत्याः। मृगारेष्टिर्वा पवि
त्रेष्टिर्वा मित्रविंदा वा पशुर्वा तिलहोमायुतं वा पराकद्वयं वा जद्व्यसंख्याकगायत्रीजपो
वेति चांद्रायणप्रत्याम्नायाः। पराकतप्तकृच्छ्रातिकृच्छ्राणां तु प्रत्येकं त्रयः प्राजापत्याः प्रत्या
म्नायाः। अत्र च धेनोर्यन्निष्कादि मूल्यमुक्तं तद्दतिधानिकविषयं। किंचित्किंचिद्धनिक शिव ।।३।।

विषयत्वेन तु कं षड्त्रिंशन्मते। धेनुः पंचभिराख्यानां मध्यानां त्रिपुराणिका। कार्षापणैकमूल्या
ति २ हिकनिष्कानां प्रकीर्त्तितौ द्वात्रिंशत्कृष्णलपरिमितं रजतं पुराणः। कार्षापणस्तु पूर्वस्यामुत्त
रस्यां वा दिशि अष्टोढबूकाः षोडशपणाः स एकः कार्षापणः। तावत्ताम्रं रूप्यं दक्षिणस्यां
पश्चिमायां वा कार्षापणः। यत्तु द्वात्रिंशत्पणिका गावो वत्साः पौराणिको भवेदिति तत्तद्दे
विषयमिति शूलपाणिः। कात्यायनोपि यज्ञविषये आवश्यकदक्षिणादाने प्रकृत्याह। द्वात्रिं
शत्पणिका गावः स्वनुः कार्षापणो वरः। वृषे षट्कार्षापणका अष्टावनडुहि स्मृतः। दश
कार्षापणा धेनावितिं। कृष्णात्रयमितो वल्लः। एवं निवेदितं प्रायश्चित्तं भवदनुग्रहदङ्गीक
त्यकानंतरे प्रायश्चित्ताचरणे सन्मानपूर्वकं पर्षदं प्रणम्य तस्याः विसर्जनं। तत्कालमेव
तदाचरणेतु नैव तस्याः विसर्जनं। अस्मिन्नहनि शक्ते नोपवासः। इतरेण हविष्याशनं।

ततस्तस्मिन्नन्यस्मिन्वाऽहनि रिक्तायामसंभवेऽन्यस्यां वा तिथौ कृतमाध्याह्निके सायाह्ने गं
गादितीर्थे स्नात्वाचमनं। त्रीन्प्राणायामान्कृत्वा देशकालयोः संकीर्त्तनं। तत्र प्रयागस्नानवि
धौ नारायणभट्टैः प्रदर्शितं। यथा। श्रीमदनंतवीर्यस्यादिनारायणस्याचिंत्यापरिमितशक्त्या
ध्रियमाणस्य महाजलौघमध्ये परिभ्रममाणानामनेककोटिब्रह्मांडानामेकतमेऽव्यक्त
महदहंकारपृथिव्यप्तेजोवाय्वाकाशाद्यावरणैरावृतेऽस्मिन्महति ब्रह्मांडखंडयोर्मध्ये आ
धारशक्तिवराहकूर्मानंताद्यष्टदिग्गजोपरि प्रतिष्ठिते सप्तपातालोपरिभागे सत्यांतजो
कच्छपकुलस्याधोभागे महाकालायमानशेषस्य सहस्रफणामणिमंडिते दिग्दंतिशुं
डादंडोन्नमिते लोकालोकाचलवलयितलवणेक्षुसुरासर्पिर्दधिक्षीरोदकार्णवपरि शिव.
वृते जंबूप्लक्षशाल्मलिकुशक्रौंचशाकपुष्करसप्तद्वीपाढ्ये द्वीपे तेकांस्यताम्रगभस्तिनाग ॥५८॥

सौम्यगंधर्वचारणभारतादिनवखंडखंडिते भारतवर्षे भरतखंडे अयोध्यामथुरामायाकाशीकां
च्यवंती द्वारवतीकुरुक्षेत्रपुष्करादिनानातीर्थयुक्तकर्मभूमौ मध्यरेखायाः पूर्वदिग्भागे भा
गीरथ्याः पश्चिमे तीरे जगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीये परार्द्धे द्वितीयपरार्द्धस्य
प्रथमे वर्षे प्रथममासे प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीये यामे तृतीये मुहूर्ते प्रथम
घटिकायां सप्तमे वैवस्वतमन्वंतरे अष्टाविंशतितमे कलियुगे प्रथमचरणे बौद्धावता
रे विक्रमशके वर्तमाने ऽमुकनाम्नि संवत्सरे अयने ऋतौ मासे पक्षे तिथौ वारे नक्षत्रे योगे
करणे च अमुकराशिस्थिते चंद्रे अमुकराशिस्थिते सवितरि अमुकराशिस्थिते देवगु
रौ शेषेषु ग्रहेषु यथास्थानस्थितेषु सत्सु एवं गुणविशिष्टे देशकाले चैवं देशकालौ स
कीर्त्यामुकशर्मणो मम जन्मप्रभृति अद्यदिनं यावत् ज्ञाताज्ञातकामाकामसकृदसकृत्

नकायिकवाचिकमानसिकसांसर्गिकस्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसकलपातकातिपातको
पपातकलघुपातकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशप्रकीर्णकपातकानां क०र२
क्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं पर्षदुपदिष्टममुकप्रायश्चित्तममुकप्रत्याम्नायद्वारापूर्वोत्त
रांगसहितं यथाशास्त्रमहमाचरिष्य इति संकल्पं कृत्वा प्रारिप्सितप्रायश्चित्तस्य प्राच्यांगानि
करिष्य इत्यपरः संकल्पः कार्यः। ॐ यानि कानि च पापानि ब्रह्महत्यासमानि च। केशानाश्रि
5 त्य तिष्ठंति तस्मात्केशान्वपाम्यहम् इति मंत्रं पठित्वा शिखाकक्षोपस्थवर्जं केशश्मश्रुनखरो
म्णां वापनं। प्रथमतो दक्षिणं कर्णमारभ्य वामकर्णपर्यंतमुदकं स्पृष्ट्वा केशवापनं। ततः श्म
श्रुलोमनखानां क्रमेणोदकस्पृष्टानां वापनं। ततः क्षौरनिमित्तं शीतोदकेन स्नानं करिष्य इति सं
कल्पपूर्वकं स्नात्वाचमनं। ॐ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्मप्रज्ञां च मेधां च शिव.

॥५॥

१ ॥ मुखदुर्गंधिनाशाय दंतानां च विशुद्धये।
ष्ठीवनाय च गात्राणां कुर्वेहं दंतधावनं॥१॥

त्वन्नो धेहि वनस्पते इति मंत्रेण प्राङ्मुखेन द्वादशांगुलं दंतकाष्ठाभिमंत्रणं। ॐ अन्नाद्याय व्यू
हध्वमिति मंत्रेण काष्ठाग्रं किंचिच्चर्वयित्वा तेन प्रदेशेन दंतानां शोधनं। काष्ठांतरेण च जिह्वो
ल्लेखनं। स्ववामभागे तस्य निक्षेपः। कर्णौ त्वौ स्त्रो आचमनं। अथ प्रदेशकालयोः संकीर्तनां
पनर्वासिं भवस्य भस्मधारणं। ते करिष्यमाणस्नानं यज्ञियं गत्वेन भस्मादिभिर्देशकालानानिकरिष्य इति संकल्पः। त
तो भस्मस्नानं। ॐ ईशानः सर्वविद्यानामिति शिरसि। ॐ तत्पुरुषायेति मुखे। ॐ अघोरे
भ्य इति हृदये। ॐ वामदेवायेति गुह्ये। ॐ सद्योजातमिति पादयोः। प्रणवेन सर्वांगे धार
णं। अथ गोमयस्नानं। ॐ अग्रमग्रं चरंतीनामोषधीनां वने वने। तासामृषभपत्नीनां प
वित्रं कायशोधनं। तन्मे रोगांश्च शोकांश्च नुद गोमय सर्वदेति मंत्रेण गोमयस्याभिमंत्रणं।
सर्पापप्रदर्शनं। ॐ मानस्तोक इत्यनेन मंत्रेण गोमयेन दक्षिणहस्तगृहीतेन शिरस्तो

नाभ्यंतं वामहस्तगृहीतेन नाभितः पादांतं विलेपनं। अत्र च देशभेदान्मंत्रावृत्तिः। अथ मृदास्ना
नं। अश्वक्रांते रथक्रांते विष्णुक्रांते वसुंधरे। शिरसा धारयिष्यामि रक्षस्व मां पदे पदे इति मृदा
भिमंत्रणं। ॐ उद्धृतासि वराहेण कृष्णेन शतबाहुना। मृत्तिके ब्रह्मदत्तासि कश्यपेनाभिवंदिता।
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतं। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितं। त्वयाहृतेन
पापेन जीवामि शरदां शतमिति मृदुद्धरणं। ॐ नमो मित्रस्येत्यनेन सूर्याय प्रदर्शनं। इ
दं विष्णुरित्यनया पूर्ववन्मृदां गात्रालेभनं। अथ शुद्धोदकस्नानं। ॐ आपोहिष्ठेति तिसृ
भिः सूर्याभिमुखेन स्नानं। अथ गायत्र्या गोमूत्रेण स्नानं। ॐ गंधद्वारामित्यनेन गोमये
न पूर्ववत्सर्वांगान्यनुलिप्य स्नानं। ॐ आप्यायस्वेति क्षीरेण स्नानं। ॐ दधिक्राव्ण इ
ति दध्ना मूर्द्धादिपादांतान्यंगान्यनुलिप्य स्नानं। ॐ तेजोसीत्याज्येन पूर्ववत् स्नानं। ॐ देव

१ घृतं मिमिक्ष इत्याज्येन। १

6

मंत्रेण

२ मानस्तोक इत्यनया गोमयेन स्नानं।। २

शिव.

।।६।।

स्यत्वेलादिनापूक्तो हस्ताभ्यां अभिषिंचामीत्यंतेनमंत्रेण कुशोदकेन स्नानं। एतानि दूं
शस्नानानि मंत्रकालिवेलुक्तं महालये वे। स्त्रीशूद्राणां तु मंत्रकार्यं एव वा। ततो नित्यस्ना
नविधिना स्नानं केचिदाचरंति। ततः स्नानांगतर्पणं। धौतवाससी परिधाय द्विरा
चम्योर्ध्वपुंड्रधारणं। कृतकुशोपग्रहेण ततो यथोक्तं विष्णुश्राद्धं। अथवा विष्णुं पूज
यित्वा तदुद्देशेन त्रिभ्योधिकानां युग्मब्राह्मणानामर्चनं देशकालौ संकीर्त्य त्रिभ्यो
धिकान् युग्मान् ब्राह्मणान् विष्णूद्देशेन भोजयिष्य इति संकल्पपूर्वकं भोजनदान
दानमामान्नदानं वेतीदमेव प्रायश्चित्तांगं विष्णुश्राद्धमित्युक्तं वेतो नारायणम
हः। ततः प्रायश्चित्तस्य पूर्वांगत्वेन यथोक्तप्रकारेण प्रत्यक्षं तो गोदानं प्रत्यक्षासंभवे
प्रायश्चित्तस्य पूर्वांगतया विहितगोदानफलप्राप्त्यै न यथाशक्ति गोमूल्यं तुभ्यमहं सं

पुराणमंत्रैर्पं८
नीमाः २

४ विष्णुसंकल्प।

४ तेन पापफलवि
लुप्तापत्तां। ४

१ ततो गोदानं। २
यथेत्यादि॰ प्राय
श्चित्त १

यथानामगोत्राय ब्राह्मणाय दातु
मुत्सृजे॥ १ गवी
यजेपुं॰ चे॥ १

प्रददेनममेतिगोमूल्यदानंवेति। अथमहाव्याहृतिहोमः। कर्त्तास्थंडिलसमीपेउपवेशनं। आ ११
चम्यप्राणानायम्यदेशकालौसंकीर्त्यआशिष्मितआयष्मितस्यपूर्वांगतयाविहितंमहा
व्याहृतिभिराज्येनाष्टोत्तरशतंअष्टाविंशतिर्वाहोमंकरिष्येइतिसंकल्पः। ततःस्थंडि
7 लेपंचभूसंस्कारपूर्वकंलौकिकाग्निस्थापनं। शालाग्निसत्वेतुतत्रैवहोमः। ततोअ
ग्नौप्रवेशनाद्याज्यभागांते। तत्रविशेषः। पात्रासादनानंतरमुपकल्पनीयानि। स्रु
वर्णादिपात्रंपद्मपलाशादिपत्रंवा। यज्ञियकाष्ठं। हरितानिसप्तकुशपत्राणि। पंच गोमूत्रादि ४
३ आघारावाज्यभागौकृत्वा३ गव्यंचपृथक्पृथक्। ततोऽष्टोत्तरशतमष्टाविंशतिर्वाज्याहुतीनांव्यस्तसमस्ताभिर्महा
व्याहृतिभिर्होमः। ॐभूःस्वाहा। इदमग्नये। ॐभुवःस्वाहा। इदंवायवे। स्वःस्वाहा। शिव
इदंसूर्याय। भूर्भुवःस्वःस्वाहा। इदंप्रजापतये। एवंसप्तवारंकृतेअष्टाविंशतिराहुतयः। ॥७॥

॥ अथवाहोमद्रव्यंब्राह्मणायवादद्यात्। व्याहृतिहोमसिद्ध्यर्थंमनःसंकल्पितंघृतंअभिवासुसर्पमीत्यर्थंब्राह्मणाया
हंदास्ये। तेनव्याहृतिहोमसिद्धिरस्तु॥

सप्तविंशतिवारंकृतेष्टोत्तरशतमाहुतयश्चभवंति। अथब्रह्मकूर्चहोमः। तत्रसुवर्णादिपा
त्रेपद्मपलाशादिपत्रेवागायत्र्याअष्टमाषमितंगोमूत्रस्यग्रहणं। ॐगंधद्वारामितिमंत्रे
णषोडशमाषमितंगोमयग्रहणं। ॐआप्यायस्वेतिमंत्रेणद्वादशमाषमितंक्षीरस्य
दानं। दधिक्राव्णइतिमंत्रेणदशमाषमितंदधिग्रहणं। ॐतेजोसीतिमंत्रेणअष्टमाषमितं १४
आज्यग्रहणं। ॐदेवस्यत्वेत्यादिकेनपृष्ठोहस्ताभ्यांगृह्णामीत्यंतेनचतुर्माषमितंकु
शोदकग्रहणं। गोमूत्रादिकापिलंवाग्राह्यं। अलाभेगव्यमात्रं। ततःप्रणवेनहस्तेना
लोडनं। प्रणवेनैवयज्ञियकाष्ठेननिर्मंथनं। प्रणवेनाभिमंत्रणं। पंचगव्येनहरितैः
सप्तकुशपत्रैर्दशाहुतिहोमः। सयथा। इरावतीतिवसिष्ठऋषिःत्रिष्टुप्छंदःविष्णुर्देवता
आयश्चित्तांगपंचगव्यहोमेविनियोगः। ॐइरावतीधेनुमती० स्वाहा। इदंविष्णवे।

इदंपिब्याइतिकेचित्॥१

दं विष्णुरिति मेधातिथिर्ऋषिः गायत्री छंदः विष्णुर्दे० प्राय० गः। ॐ इदं विष्णुर्विचक्रमे० स्वाहा। इ
दं विष्णवे। मानस्तोक इ कुत्सऋ० जग० एको रुद्रो दे० प्राय० गः। ॐ मानस्तोके० हे स्वाहा। इदं
रुद्राय। उदकोपस्पर्शनं। ब्रह्मजज्ञानमित्यस्य प्रजापतिर्ऋ० त्रिष्टुप्० आदित्यो देव० प्रा०
गः। ॐ ब्रह्मजज्ञानं० वः स्वाहा। इदं ब्रह्मणे। ॐ अग्नये स्वाहा। इदमग्नये। ॐ सोमाय स्वा
हा। इदं सोमाय। तत्सवितुरिति विश्वामित्र ऋ० गायत्री० सविता दे० प्राय० गः। ॐ तत्स
8 वितु० यात् स्वाहा। इदं सवित्रे। ॐकारस्य ब्रह्मा ऋ० दैवी गायत्री० परमात्मा दे० प्राय० श्रि ९
गः। ॐ स्वाहा। इदं परमात्मने। महाव्याहृतीनां प्रजापतिर्ऋ० दैवी गायत्री दैवी उष्णि
क् दैवी गायत्री छंदांसि। अग्निवायुसूर्या दे० प्राय० गः। भूर्भुवः स्वः स्वाहा। इदं प्र शिव
जापतये। ॐ अग्नये स्विष्टकृते स्वाहा। इदमग्नये स्विष्टकृते। इदं प्रयोगरत्नानु ॥८॥
सारी होमः।

ततोमहाव्याहृत्यादिप्राजापत्यांतानवाहुतीर्हुत्वासंस्रवप्राशनादिप्रणीताविमोकां
तंकृत्वाप्रायश्चित्तांगहोमस्यसगुणतासिध्यर्थंब्रह्मणेपूर्णपात्रंवरोवादक्षिणांतुभ्यं
व्र ३ संप्रददेनममतेनैवंपूर्णपात्रयोरन्यतरदानं।ततोग्रामाद्बहिःस्नात्वारकोदयेव्रतग्रह
णंकरिष्यइतिविप्रान्प्रतिप्रश्नः।कुरुष्वेतितैःप्रत्युक्तेप्रणवेनसर्वस्यापिप्रकृतशेषस्य
पंचगव्यस्यप्राशनं।अशक्तौगोमूत्रादिस्वल्पंग्राह्यं।अत्रव्रतंनिशामुखव्याप्तं।एवं
पंचगव्यप्राशनरूपव्रतंकृत्वोपवासएवशक्तेनास्मिन्नहनिकार्योऽशक्तेनहविष्याशनं।
ततोगृहेआगत्यविष्णुंस्मरतामौनिनानिशायाअतिवाहनं।प्रातःस्नानादिकृतनि
त्यक्रियेणकुशकुसुमतिलयवजलादानं।पूर्ववद्देशकालयोःसंकीर्तनांतेअमुकश
र्मणोममजन्मप्रभृतिअद्यदिनंयावदित्यादिक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थमित्यंतं

॥पूर्ववद्विष्णुस्मरणं। विष्णुश्राद्धं। गोदानं। त्वद्येत्यादि॰ प्रारिप्सितप्रायश्चित्तस्य उत्तरांगतया विहितगोदानप्रत्याम्नायत्वेन यथाशक्ति गोमूल्यं
यथानामगोत्राय ब्राह्मणाय संप्रददे तुभ्यमहं संप्रददे। गवामंगेषु तिष्ठंति भुवनानि चतुर्दश। यस्मात्तस्माच्छिवं मे स्यादिह लोके परत्र च। अत्र येन महाव्याहृति
भिरष्टाविंशति होमः। नोत्र पंचगव्येन होमः॥ ततः सं प्राजापत्याख्य प्रवप्राशनं। पवित्राभ्यां मार्जनं पवित्रप्रतिपत्तिः। प्रणीताविमोकः। अग्निम्नाप

श्चित्तकर्मणि कृत
तस्य होमस्य संपु
र्णतासिद्ध्यर्थं द्र
व्यपात्रं वरोवाद
क्षिणांभसद्धु
भ्यमहं संप्रददे।
इति ब्राह्मणेदक्षि
णादानं। इति।॥

पूर्ववदुक्त्वा एतावत्संख्याकानां अमुकप्रत्याम्नायद्वारा गृहमाचरिष्ये इति प्रधानसंकल्पः।
अमुकांतं प्रायश्चित्तं तद्देवतासंकल्पितगोमूल्यादिप्रत्याम्नायैः समापनीयं। दशकालेनेमी
च्चारणपूर्वकं कृतामुकप्रायश्चित्तस्योत्तरांगानि करिष्य इति संकल्पः। व्याहृतिभिराज्य
होमः प्रायश्चित्तांगविष्णुश्राद्धगोदानानां पूर्ववदाचरणं। अग्न्यंते नव ब्रह्मकूर्चहोमः। तत्र
स्कृतस्य पंचगव्यस्याग्रेप्राशनाभावात्॥ यथाशक्तितो दशदानानि कार्याणि। तानि
च। गोभूतिलहिरण्याज्यवासोधान्यगुडानि च। रौप्यं लवणमित्याहुर्दशदानानि
पंडिताः॥ यथाशक्त्यनुक्रमेण कार्याणि॥ एवं दशदानानि विधाय। ॐ मंत्रहीनं क्रियाहीनं भ
क्तिहीनं यत्कृतं। भवतु संपूर्णं त्वत्प्रसादात्तत्सर्वमच्छिद्रं परिपूर्णमस्तु मे इत्युक्त्वा यन्मया कृतममु
कप्रायश्चित्तं तन्मेऽच्छिद्रमस्त्विति ब्राह्मणप्रार्थना। अच्छिद्रमस्त्विति प्रतिवचनं। यदा। अ

शिव:
॥१८॥

१८

9

॥अथ म॰ प्रायश्चित्तविधेः परिसमाप्तिर्नामास्तु॥१
॥निर्द्धनश्चेत्। नीर्थस्नानादि कुर्यात्॥

तच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि। सर्वं भवतु तेऽच्छिद्रं यस्य चेच्छंति वै द्विजाः इति प्रतिवचनं॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वंदे तमच्युतमि
ति विष्णुवंदनं। इति सर्वप्रायश्चित्तप्रयोगः॥ संवत १८१६ वर्षे पौषकृष्ण अमावास्यायां
बुधे याज्ञिकदेवकृष्णसूनुना करुणाकृष्णेन लिखितमिति शिवम्॥ ॥शुभमस्तु॥॥

रुद्रकल्पद्रुमो
क्त ३

10

अथैतत्प्रयोगानुसारेणोपकरणानि ॥

सचैलस्नानार्थं उदकं
पर्वद्वयपक्षे १
गोदानद्रव्यं
कुशाः
तिलयवाः
आचमनीयपात्रं
शुद्धोदकं
चंदनं
पुष्पाणि
पुष्पमालापक्षे २
तुलसी
धूपः
दीपः
नैवेद्यं
पूगीफलानि
तांबूलानि
दक्षिणाद्रव्यं
अनुवादकब्राह्मण
तद्दक्षिणाद्रव्यं
नापित
औदुंबरदंतधावनकाष्ठ २
विभूति
गोमूत्रं
गोमयं

गोदुग्धं
गोदधि
गोघृतं
गंगामृदः
शक्तौ नूतनवस्त्रद्वयं
उपवीतं
शालिग्रामशिला
आमान्नानि ८
आमद्रव्यं वा
पूर्वोत्तरगोदानद्रव्यं

होमोपकरणानि
शरावद्वयं
आज्यस्थाली
पलाशसमिधः
स्रुवः खादिरः
घृतं
पूर्णपात्रतंडुलाः
यज्ञियकाष्ठं
पलाशपत्रं महत्
प्रधान्नायद्रव्यं
अपत्नीदक्षिणाद्रव्यं
आचारात्मुखावलो
कनीयं साज्यं कांस्यपात्रं